Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ "घोरे ज्वरे घोरतरे च शूले" इति पुरुषसूक्तयन्त्रस्य पूर्वं ज्वरशान्तिप्रदत्वमुक्तं किल तत्प्रसङ्गात् ज्वरशान्तिकरं कुबेरयन्त्रमपि मन्त्रसारोक्तमत्र योग्यतावशाल्लिख्यते —

कर्णिकायां लिखेत्तारं क्रमात्पत्रेषु चाष्टसु ।
वर्णान् कुबेरमन्त्रस्य चतुरश्चतुरो बहिः ॥

रक्षोहणं वाजिनमित्यृचा मातृकया वृतम् ।
भूपुराश्रिषु ठंबीजं वंबीजं दिक्षु चालिखेत् ॥

एतद्यन्त्रं कुबेरस्य रक्षाकरमनुत्तमम् ।
चातुर्थिकादिविषमज्वरौघानाशु हन्ति च ॥

अस्यार्थः — प्रथममष्टपत्रं विलिख्य तत्कर्णिकायां प्रणवं विलिख्य, तन्मध्ये साध्यनामादियन्त्रन्यायान् विलिखेत् । पुनरष्टपत्रेषु,

कुबेरं ते मुखं रौद्रं नन्दिमानन्दिमावह ।
ज्वरं मृत्युं भयं घोरज्वरं नाशय मे ज्वर ॥

इत्यस्य मन्त्रस्य वर्णान् चतुरश्चतुरो विलिखेत् । पुनस्तद्बहिर्वृत्तद्वयं विलिख्य पूर्ववृत्ते "रक्षोहणं वाजिनमाजिघर्मि" इत्यृचा वेष्टयेत् । द्वितीये वृत्ते मातृकया वेष्टयेत् । तद्बहिर्भूपुरं विलिख्य तत्कोणेषु ठंठं इति विलिख्य, तद्दिक्षु वंवं इति विलिखेत् । एवं विलिख्य धृते उक्तफलं भवति ॥

अथ ज्वरशान्ति(कर)यन्त्रप्रसङ्गात् ज्वरशान्तिप्रदो मन्त्रः कल्पान्तरोक्तः शैवज्वरविषयोऽत्र योग्यतावशाल्लिख्यते ॥

ज्वरमन्त्रस्य कालाग्निः ऋषिः । अनुष्टुप् छन्दः । कालज्वरो देवता । आं बीजम् । ज्वरः शक्तिः । ज्वरशमनार्थे विनियोगः ।

रक्तं त्रिणेत्रं त्रिपदं त्रिहस्तं त्रिशूलिनं रुद्रसुतं कृशाङ्गम् ।
भस्मायुधं चक्रशशाङ्कमौलिं ध्यायेत्समस्तं त्रिपदं ज्वरं तम् ॥

त्रिपादहस्तनेत्राय त्रिशीर्षाय नमो नमः ।
ज्वराय व्याधिराजाय दक्षारे श्वासमूर्तये ॥

ॐ त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः ।
स मे प्रीतस्सुखं दद्यात्सर्वामयपतिर्ज्वरः ॥

कुबेरं ते मुखं रौद्रं नन्दिमानन्दिमावह ।
ज्वरं मृत्युं भयं घोरज्वरं नाशय मे ज्वर ॥

भस्मायुधाय विद्महे एकदंष्ट्राय धीमहि ।
तन्नो ज्वरः प्रचोदयात् ॥

अथ शैवज्वरमन्त्रानन्तरं वैष्णवज्वरशान्तिकरमन्त्रोऽप्यत्र योग्यतानशाल्लिख्यते —

आद्यन्तनन्तः कवयः पुराणाः सूक्ष्मा बृहन्तो ह्यनुशासितारः ।
सर्वान् ज्वरान् घ्नन्तु ममानिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः ॥

ज्वरं च ज्वरसारं च ज्वरातीसारमेव च ।
शीतज्वरं तथा धूम्रं सन्निपातज्वरं तथा ॥

एकाहिकं द्व्याहिकं च तथा त्रिदिवसज्वरम् ।
चातुर्थिकं तथात्युग्रं तथा सन्ततकज्वरम् ॥

दोषोत्थं सन्निपातोत्थं तथैवागन्तुकज्वरम् ।
शमं नयाशु गोविन्द छिन्धि भिन्ध्यस्य वेदनाम् ॥